# ઋ૮ છમકમ

ઓં અગ્ના'વિષ્ણો સજોષ'સેમાવ'ર્ધંતુ વાં ગિરઃ' | દ્યુમ્નૈર્-વાજે'ભિરાગ'તમ્ | વાજ'શ્ચ મે
પ્રસવશ્ચ' મે પ્રય'તિશ્ચ મે પ્રસિ'તિશ્ચ મે ધીતિશ્ચ' મે
ક્રતુ'શ્ચ મે સ્વર'શ્ચ મે શ્લોક'શ્ચ મે શ્રાવશ્ચ' મે શ્રુતિ'શ્ચ મે જ્યોતિ'શ્ચ મે સુવ'શ્ચ મે પ્રાણશ્ચ' મેઉપાનશ્ચ'
મે વ્યાનશ્ચ મેઉસુ'શ્ચ મે ચિત્તં ચ' મ આધી'તં ચ મે વાક્ચ' મે મન'શ્ચ મે ચક્ષુ'શ્ચ મે શ્રોત્રં'
ચ મે દક્ષ'શ્ચ મે બલં' ચ મ ઓજ'શ્ચ મે સહ'શ્ચ મ આયુ'શ્ચ મે જરા ચ' મ આત્મા ચ' મે તનૂશ્ચ' મે શર્મ'
ચ મે વર્મ' ચ મેઉંગા'નિ ચ મેઉસ્થાનિ' ચ મે પરૂગ્મ્'ષિ ચ મે શરી'રાણિ ચ મે || 1 ||
જૈષ્ઠ્યં' ચ મ આધિ'પત્યં ચ મે મન્યુશ્ચ' મે ભામ'શ્ચ મેઉમ'શ્ચ મેઉંભ'શ્ચ મે જેમા ચ' મે મહિમા ચ' મે
વરિમા ચ' મે પ્રથિમા ચ' મે વર્ષ્મા ચ' મે દ્રાઘુયા ચ' મે વૃદ્ધં ચ' મે વૃદ્ધિ'શ્ચ મે સત્યં ચ' મે શ્રદ્ધા
ચ' મે જગ'ચ્ચ મે ધનં' ચ મે વશ'શ્ચ મે ત્વિષિ'શ્ચ મે ક્રીડા ચ' મે મોદ'શ્ચ મે જાતં ચ' મે જનિષ્યમા'ણં ચ
મે સૂક્તં ચ' મે સુકૃતં ચ' મે વિત્તં ચ' મે વેદ્યં' ચ મે ભૂતં ચ' મે ભવિષ્યચ્ચ' મે સુગં ચ' મે સુપથં ચ મ ઋદ્ધં
ચ મ ઋદ્ધિશ્ચ મે ક્લુપ્તં ચ' મે ક્લુપ્તિ'શ્ચ મે મતિશ્ચ' મે સુમતિશ્ચ' મે || 2 ||
શં ચ' મે મય'શ્ચ મે પ્રિયં ચ' મેઉનુકામશ્ચ' મે કામ'શ્ચ મે સૌમનસશ્ચ' મે ભદ્રં
ચ' મે શ્રેય'શ્ચ મે વસ્ય'શ્ચ મે યશ'શ્ચ મે ભગ'શ્ચ મે દ્રવિ'ણં ચ મે યંતા ચ' મે ધર્તા
ચ' મે ક્ષેમ'શ્ચ મે ધૃતિ'શ્ચ મે વિશ્વં' ચ મે મહ'શ્ચ મે સંવિચ્ચ' મે ઙ્ગાત્રં' ચ મે સૂશ્ચ' મે પ્રસૂશ્ચ' મે સીરં' ચ
મે લયશ્ચ' મ ઋતં ચ' મેઉમૃતં' ચ મેઉયક્ષ્મં ચ મેઉના'મયચ્ચ મે જીવાતુ'શ્ચ મે દીર્ઘાયુત્વં ચ'
મેઉનમિત્રં ચ મેઉભ'યં ચ મે સુગં ચ' મે શય'નં ચ મે સૂષા ચ' મે સુદિનં' ચ મે || 3 ||
ઊર્ક્ચ' મે સૂનૃતા' ચ મે પય'શ્ચ મે રસ'શ્ચ મે ઘૃતં ચ' મે મધુ' ચ મે સગ્ધિ'શ્ચ મે સપી'તિશ્ચ
મે કૃષિશ્ચ' મે વૃષ્ટિ'શ્ચ મે જૈત્રં' ચ મ ઔદ્ભિ'દ્યં ચ મે રયિશ્ચ' મે રાય'શ્ચ મે પુષ્ટં ચ મે પુષ્ટિ'શ્ચ મે વિભુ ચ'
મે પ્રભુ ચ' મે બહુ ચ' મે ભૂય'શ્ચ મે પૂર્ણં ચ' મે પૂર્ણત'રં ચ મેઉક્ષિ'તિશ્ચ મે કૂય'વાશ્ચ મેઉન્નં' ચ મેઉક્ષુ'ચ્ચ
મે વ્રીહય'શ્ચ મે યવા"શ્ચ મે માષા"શ્ચ મે તિલા"શ્ચ મે મુદ્ગાશ્ચ' મે ખલ્વા"શ્ચ મે ગોધૂમા"શ્ચ મે મસુરા"શ્ચ
મે પ્રિયંગ'વશ્ચ મેઉણ'વશ્ચ મે શ્યામાકા"શ્ચ મે નીવારા"શ્ચ મે || 4 ||
અશ્મા ચ' મે મૃત્તિ'કા ચ મે ગિરય'શ્ચ મે પર્વ'તાશ્ચ મે સિક'તાશ્ચ મે વનસ્-
પત'યશ્ચ મે હિર'ણ્યં ચ મેઉય'શ્ચ મે સીસં' ચ મે ત્રપુ'શ્ચ મે શ્યામં ચ' મે લોહં ચ' મેઉગ્નિશ્ચ' મ આપ'શ્ચ
મે વીરુધ'શ્ચ મ ઓષ'ધયશ્ચ મે કૃષ્ણપચ્યં ચ' મેઉકૃષ્ણપચ્યં ચ' મે ગ્રામ્યાશ્ચ' મે પશવ'
આરણ્યાશ્ચ' યઙ્ઞેન' કલ્પંતાં વિત્તં ચ' મે વિત્તિ'શ્ચ મે ભૂતં ચ' મે ભૂતિ'શ્ચ મે વસુ' ચ મે વસતિશ્ચ' મે કર્મ'
ચ મે શક્તિ'શ્ચ મેઉર્થ'શ્ચ મ એમ'શ્ચ મ ઇતિ'શ્ચ મે ગતિ'શ્ચ મે || 5 ||
અગ્નિશ્ચ' મ ઇંદ્ર'શ્ચ મે સોમ'શ્ચ મ ઇંદ્ર'શ્ચ મે સવિતા ચ' મ ઇંદ્ર'શ્ચ મે સર'સ્વતી ચ મ ઇંદ્ર'શ્ચ મે પૂષા
ચ' મ ઇંદ્ર'શ્ચ મે બૃહસ્પતિ'શ્ચ મ ઇંદ્ર'શ્ચ મે મિત્રશ્ચ' મ ઇંદ્ર'શ્ચ મે વરુ'ણશ્ચ મ ઇંદ્ર'શ્ચ મે ત્વષ્ઠા' ચ મ ઇંદ્ર'શ્ચ
મે ધાતા ચ' મ ઇંદ્ર'શ્ચ મે વિષ્ણુ'શ્ચ મ ઇંદ્ર'શ્ચ મેઉશ્વિનૌ' ચ મ ઇંદ્ર'શ્ચ મે મરુત'શ્ચ મ ઇંદ્ર'શ્ચ મે વિશ્વે' ચ
મે દેવા ઇંદ્ર'શ્ચ મે પૃથિવી ચ' મ ઇંદ્ર'શ્ચ મેઉંતરિ'ક્ષં ચ મ ઇંદ્ર'શ્ચ મે દ્યૌશ્ચ' મ ઇંદ્ર'શ્ચ મે દિશ'શ્ચ મ ઇંદ્ર'શ્ચ
મે મૂર્ધા ચ' મ ઇંદ્ર'શ્ચ મે પ્રજાપ'તિશ્ચ મ ઇંદ્ર'શ્ચ મે || 6 ||
અગ્ંશુશ્ચ' મે રશ્મિશ્ચ મેઉદા"ભ્યશ્ચ મેઉધિ'પતિશ્ચ મ ઉપાગ્ંશુશ્ચ' મેઉંતર્યામશ્ચ' મ ઐંદ્રવાયવશ્ચ' મે
મૈત્રાવરુણશ્ચ' મ આશ્વિનશ્ચ' મે પ્રતિપ્રસ્થાન'શ્ચ મે શુક્રશ્ચ' મે મંથી ચ' મ આગ્રયણશ્ચ' મે વૈશ્વદેવશ્ચ'
મે ધ્રુવશ્ચ' મે વૈશ્વાનરશ્ચ' મ ઋતુગ્રહાશ્ચ' મેઉતિગ્રાહ્યા"શ્ચ મ ઐંદ્રાગ્નશ્ચ' મે વૈશ્વદેવશ્ચ' મે મરુત્વતીયા"શ્ચ
મે માહેંહેંહેંદ્રશ્ચ' મ આદિત્યશ્ચ' મે સાવિત્રશ્ચ' મે સારસ્વતશ્ચ' મે પૌષ્ણશ્ચ' મે પાત્નીવતશ્ચ' મે
હારિયોજનશ્ચ' મે || 7 ||
ઇધ્મશ્ચ' મે બર્હિશ્ચ' મે વેદિ'શ્ચ મે દિષ્ણિ'યાશ્ચ મે સ્રુચ'શ્ચ મે ચમસાશ્ચ' મે ગ્રાવા'ણશ્ચ મે સ્વર'વશ્ચ મ
ઉપરવાશ્ચ' મેઉધિષવ'ણે ચ મે દ્રોણકલશશ્ચ' મે વાયવ્યા'નિ ચ મે પૂતભૃચ્ચ' મ

# ઋદ્ર છમકમ

આધવનીય'શ્ચ મ આગ્ની"ધ્રં ચ મે હવિર્ધાનં' ચ મે ગૃહાશ્ચ' મે સદ'શ્ચ મે પુરોડાશા"શ્ચ મે પચતાશ્ચ'
મેઉવભૃથશ્ચ' મે સ્વગાકારશ્ચ' મે || 8 ||
અગ્નિશ્ચ' મે ધર્મશ્ચ' મેઉર્કશ્ચ' મે સૂર્ય'શ્ચ મે પ્રાણશ્ચ' મેઉશ્વમેધશ્ચ' મે
પૃથિવી ચ મેઉદિ'તિશ્ચ મે દિતિ'શ્ચ મે ધૌશ્ચ' મે શક્વ'રીરંગુલ'યો દિશ'શ્ચ મે યઙ્એન'
કલ્પંલ્પંલ્પંતામૃક્ચ' મે સામ' ચ મે સ્તોમ'શ્ચ મે યજુ'શ્ચ મે દીક્ષા ચ' મે તપ'શ્ચ મ ઋતુશ્ચ' મે વ્રતં ચ'
મેઉહોરાત્રયો"ર્-દૃષ્ટ્યા બૃ'હદ્રથંતરે ચ મે યઙ્એન' કલ્પેતામ્ || 9 ||

ગર્ભા"શ્ચ મે વત્સાશ્ચ' મે ત્ર્યવિ'શ્ચ મે ત્ર્યવીચ' મે દિત્યવાટ્ ચ' મે દિત્યૌહી ચ' મે પંચા'વિશ્ચ મે પંચાવી ચ'
મે ત્રિવત્સશ્ચ' મે ત્રિવત્સા ચ' મે તુર્યવાટ્ ચ' મે તુર્યૌહી ચ' મે પષ્ઠવાટ્ ચ' મે પષ્ઠૌહી ચ' મ ઉક્ષા ચ'
મે વશા ચ' મ ઋષભશ્ચ' મે વેહચ્ચ' મેઉનડ્વાં ચ મે ધેનુશ્ચ' મ આયુ'ર્-યઙ્એન' કલ્પતાં પ્રાણો યઙ્એન'
કલ્પતામ્-અપાનો યઙ્એન' કલ્પતાં વ્યાનો યઙ્એન' કલ્પતાં ચક્ષુ'ર્-યઙ્એન' કલ્પતાગ્ શ્રોત્રં' યઙ્એન'
કલ્પતાં મનો' યઙ્એન' કલ્પતાં વાગ્-યઙ્એન' કલ્પતામ્-આત્મા યઙ્એન' કલ્પતાં યઙ્ઓ યઙ્એન' કલ્પતામ્
|| 10 ||
એકા' ચ મે તિસ્રશ્ચ' મે પંચ' ચ મે સપ્ત ચ' મે નવ' ચ મ એકા'દશ ચ મે ત્રયોદશ ચ મે પંચ'દશ ચ
મે સપ્તદ'શ ચ મે નવ'દશ ચ મ એક'વિગ્ંશતિશ્ચ મે ત્રયો'વિગ્ંશતિશ્ચ મે પંચ'વિગ્ંશતિશ્ચ મે સપ્ત
વિગ્મ્'શતિશ્ચ મે નવ'વિગ્ંશતિશ્ચ મ એક'ત્રિગ્ંશચ્ચ મે ત્રય'સ્ત્રિગ્ંશચ્ચ મે ચત'સ્-રશ્ચ મેઉષ્ટૌ ચ' મે દ્વાદ'શ
ચ મે ષોડ'શ ચ મે વિગ્ંશતિશ્ચ' મે ચતુ'ર્વિગ્ંશતિશ્ચ મેઉષ્ટાવિગ્મ્'શતિશ્ચ મે દ્વાત્રિગ્મ્'શચ્ચ મે ષટ્-
ત્રિગ્મ્'શચ્ચ મે ચત્વારિગ્ંશચ્ચ' મે ચતુ'શ્-ચત્વારિગ્ંશચ્ચ મેઉષ્ટાચ'ત્વારિગ્ંશચ્ચ મે વાજ'શ્ચ
પ્રસવશ્ચા'પિજશ્ચ ક્રતુ'શ્ચ સુવ'શ્ચ મૂર્ધા ચ વ્યશ્નિ'યશ્-ચાંત્યાયનશ્-ચાંત્ય'શ્ચ ભૌવનશ્ચ ભુવ'નશ્-
ચાધિ'પતિશ્ચ || 11 ||
ઓં ઇડા' દેવહૂર્-મનુ'ર્-યઙ્ઞનીર્-બૃહસ્પતિ'રુક્થામદાનિ' શગ્ંસિષદ્-વિશ્વે'-દેવાઃ
સૂ"ક્તવાચઃ પૃથિ'વિમાતર્મા મા' હિગ્ંસીર્-મધુ' મનિષ્યે મધુ' જનિષ્યે મધુ' વક્ષ્યામિ મધુ'
વદિષ્યામિ મધુ'મતીં દેવેભ્યો વાચમુધાસગ્ંશુશ્રૂષેણ્યા"મ્ મનુષ્યે"ભ્યસ્તં મા' દેવા
અ'વંતુ શોભાયૈ' પિતરોઉનુ'મદંતુ ||
ઓં શાંતિઃ શાંતિઃ શાંતિઃ' ||